**શ્રી રમેશસ્તુતિઃ (શ્રી વાદિરાજયતિ વિરચિત)**

પ્રાતઃ સ્મરામિ વરકુંડલ-શોભિગંડં
શીતાંશુ-મંડલ-મુખં સિતવારિજાક્ષમ્ ।
આતામ્ર-કમ્ર-મુદિતાધર-બિંબ-જૃંભિ
ધ્યાતૃ-પ્રહર્ષ-કર-હાસરાસં રમેશમ્ ॥૧॥
પ્રાતર્ભજામિ શુભ-કૌસ્તુભ-કંબુકંઠં
સ્ફીતાત્મ-વક્ષસિ વિરાજિત-ભૂરિહારમ્ ।
ભીત-સ્વભક્ત-ભય-ભંજન-પાણિપદ્મં
શાતોદરાર્પિત-જગદ્-ભરમબ્જનાભમ્ ॥૨॥
પ્રાતર્નમામિ શુભ-કિંકિણિ-મેખલાંગં
પીતાંબરં કરિ-કરોરુ-મુદારજાનુમ્ ।
ધ્યાતાંઘ્રિ-યુગ્મ-રુચિરં જિત-કંજજાત-
વાતાદિ-દેવ-વર-મૌલિ-મણિં મુકુંદમ્ ॥૩॥
વાદિરાજ-યતિ-પ્રોક્તં શ્લોક-ત્રયમિદં શુભમ્ ।
પ્રાતઃકાલે પઠન્ મર્ત્યઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥૪॥
॥ ઇતિ શ્રીવાદિરાજયતિકૃતા રમેશસ્તુતિઃ ॥